vyOmam
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam • Value Education • Technology

कृदन्ताः

पाठः १३ – ०१.०७.२०१७

तव्य-प्रत्ययः – परिचयः, रूपाणि

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

मङ्गलम्

योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां
सञ्जीवयत्यखिल-शक्ति-धरः स्वधाम्ना ।
अन्यांश्च हस्त-चरण-श्रवण-त्वगादीन्
प्राणान् नमो भगवते पुरुषाय तुभ्यम् ॥

गुरुरेव गतिः गुरुमेव भजे गुरुणैव सहास्मि नमो गुरवे ।
न गुरोः परमं शिशुरस्मि गुरोः मतिरस्ति गुरौ मम पाहि गुरो ॥

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

पुनरावर्तनम्

- प्रत्ययः १ – ल्युट् (अन)
  - भावार्थकः
  - नपुंसकलिङ्गम्
  - सर्व-विभक्ति-वचनानि
  - रूपसिद्धिः – गुणः, णत्वम्
  - पठनम्, लेखनम्, गमनम्, करणम्
- प्रत्ययः २ – अनीयर् (अनीय)
  - कर्मवाचकः – विध्यादयः अर्थाः
  - त्रिषु लिङ्गेषु
  - सर्व-विभक्ति-वचनानि
  - रूपसिद्धिः – गुणः, णत्वम्
  - पठनीयम्, लेखनीयम्, गमनीयम्, करणीयम्

©All rights reserved.

पुनरावर्तनम्

- प्रत्ययः ३ – ण्वुल् (अक)
  - कर्तृवाचकः
  - त्रिषु लिङ्गेषु
  - सर्व-विभक्ति-वचनानि
  - रूपसिद्धिः – वृद्धिः, गुणः
  - पाठकः, लेखकः, गामकः, कारकः
- प्रत्ययः ४ – तुमुन् (तुम्)
  - क्रियार्था क्रिया, इच्छत्यादिभिः, समर्थादिभिः
  - अव्ययम् – एकमेव रूपम्
  - इट्-योग्यः प्रत्ययः
  - रूपसिद्धिः – इट्, गुणः, हल्सन्धिः
  - पठितुम्, लेखितुम्, गन्तुम्, कर्तुम्

©All rights reserved.

प्रत्ययः - ५

तव्यत् / तव्य

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अवलोकयत

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता ॥

दातव्यं भोक्तव्यं सति विभवे सञ्चयो न कर्तव्यः ।
पश्येह मधुकरिणां सञ्चितमर्थं हरन्त्यन्ये ॥

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

तव्य – विध्यर्थकः/प्रेरणार्थकः प्रत्ययः

- पठितव्यम्
- लेखितव्यम्
- शिक्षितव्यम्
- रक्षितव्यम्
- हसितव्यम्
- भवितव्यम्
- गन्तव्यम्
- क्रेतव्यम्
- कर्तव्यम्
- वक्तव्यम्
- द्रष्टव्यम्
- श्रोतव्यम्

©All rights reserved.

प्रत्ययः ५ – तव्यत्/तव्य

- तव्यत्/तव्य-प्रत्ययः – तव्य
- सर्वेभ्यः धातुभ्यः अयं प्रत्ययः भवति
- विध्यर्थकः प्रत्ययः
- प्रयोगः अनीयर्-वत्, रूपाणि तुमुन्-वत्

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – १
संयोजयत

- नाटकम् पठितव्यम्
- सङ्गीतम् द्रष्टव्यम्
- पुस्तकम् धर्तव्यम्
- फलम् श्रोतव्यम्
- वस्त्रम् वक्तव्यम्
- सत्यम् खादितव्यम्

©All rights reserved.

अभ्यासः – १ - उत्तराणि संयोजयत

• नाटकम्	पठितव्यम्	नाटकं द्रष्टव्यम्
• सङ्गीतम्	द्रष्टव्यम्	सङ्गीतं श्रोतव्यम्
• पुस्तकम्	धर्तव्यम्	पुस्तकं पठितव्यम्
• फलम्	श्रोतव्यम्	फलं खादितव्यम्
• वस्त्रम्	वक्तव्यम्	वस्त्रं धर्तव्यम्
• सत्यम्	खादितव्यम्	सत्यं वक्तव्यम्

©All rights reserved.

अभ्यासः – २
तव्य-प्रत्ययान्ते परिवर्तयत

- स्नानं कुर्यात्
- भोजनं कुर्यात्
- स्मरणं कुर्यात्
- मेलनं कुर्यात्
- पठनं कुर्यात्
- रक्षणं कुर्यात्
- गच्छेत्
- हसेत्
- आचरेत्
- क्षालयेत्
- लभेत
- वर्धेत

©All rights reserved.

अभ्यासः – २ – उत्तराणि
तव्य-प्रत्ययान्ते परिवर्तयत

- स्नानं कुर्यात्
- भोजनं कुर्यात्
- स्मरणं कुर्यात्
- मेलनं कुर्यात्
- पठनं कुर्यात्
- रक्षणं कुर्यात्

- स्नातव्यम्
- भोक्तव्यम्
- स्मर्तव्यम्
- मेलितव्यम्
- पठितव्यम्
- रक्षितव्यम्

- गच्छेत्
- हसेत्
- आचरेत्
- क्षालयेत्
- लभेत
- वर्धेत

- गन्तव्यम्
- हसितव्यम्
- आचरितव्यम्
- क्षालयितव्यम्
- लब्धव्यम्
- वर्धितव्यम्

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

तव्य-प्रत्ययस्य रूपाणि – तुमुन्नन्तेन तुल्यानि

- दातुम् – दातव्यम्
- नेतुम् – नेतव्यम्
- श्रोतुम् – श्रोतव्यम्
- कर्तुम् – कर्तव्यम्
- द्रष्टुम् – द्रष्टव्यम्
- लब्धुम् – लब्धव्यम्
- पठितुम् – पठितव्यम्
- डयितुम् - डयितव्यम्
- भवितुम् – भवितव्यम्
- ग्रहीतुम् – ग्रहीतव्यम्
- वरितुम्/वरीतुम् – वरितव्यम्/वरीतव्यम्
- प्रार्थयितुम् – प्रार्थयितव्यम्

©All rights reserved.

सेट्-धातूनां तव्य-रूपाणि

इगन्तानां गुणः

- श्रि इतव्य – श्रयितव्यम्
- शी इतव्य – शयितव्यम्
- नु इतव्य – नवितव्यम्
- भू इतव्य – भवितव्यम्
- जागृ इतव्य - जागरितव्यम्

लघु-इगुपधानां गुणः

- लिख् – लेखितव्यम्
- मिल् - मेलितव्यम्
- मुद् – मोदितव्यम्
- शुच् - शोचितव्यम्
- नृत् – नर्तितव्यम्

©All rights reserved.

सेट्-धातूनां तव्य-रूपाणि

इटः दीर्घः

- तॄ – तरितव्यम् / तरीतव्यम्
- कॄ – करितव्यम् / करीतव्यम्
- वॄ – वरितव्यम् / वरीतव्यम्
- ग्रह् - ग्रहीतव्यम्

णिजन्तानाम् अयितव्यम्

- कथ् – कथयितव्यम्
- चुर् – चोरयितव्यम्
- क्षल् – क्षालयितव्यम्
- पाठि - पाठयितव्यम्

©All rights reserved.

आचार्यानुशासनम्

सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् ।

यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि ।

©All rights reserved.

अभ्यासः – ३
अनीयर्/तव्यत्-प्रत्ययान्तैः रिक्तस्थानं पूरयत

- असत्यं _____(वृज्)_____
- दिवा न _____(शी)_____
- परधनं न _____(वाञ्छ्)_____
- उपरि स्वनाम _____(लिख्)_____
- मित्रैः सह _____(मिल्)_____
- संस्कृतेन एव _____(भाष्)_____

©All rights reserved.

अभ्यासः – ३ – उत्तराणि

अनीयर्/तव्यत्-प्रत्ययान्तैः रिक्तस्थानं पूरयत

- असत्यं _____(वृज्)_____
- दिवा न _____(शी)_____
- परधनं न _____(वाञ्छ्)_____
- उपरि स्वनाम _____(लिख्)_____
- मित्रैः सह _____(मिल्)_____
- संस्कृतेन एव _____(भाष्)_____

- वर्जनीयम् / वर्जितव्यम्
- शयनीयम् / शयितव्यम्
- वाञ्छनीयम् / वाञ्छितव्यम्
- लेखनीयम् / लेखितव्यम्
- मेलनीयम् / मेलितव्यम्
- भाषणीयम् / भाषितव्यम्

©All rights reserved.

अभ्यासः – ४
तव्य-प्रत्ययमुपयुज्य वदत

- नर्तनं करणीयम्
- निन्दनं करणीयम्
- तोलनं करणीयम्
- तरणं करणीयम्
- गणनं करणीयम्
- परीक्षणं करणीयम्

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – ४ – उत्तराणि
तव्य-प्रत्ययमुपयुज्य वदत

- नर्तनं करणीयम्
- निन्दनं करणीयम्
- तोलनं करणीयम्
- तरणं करणीयम्
- गणनं करणीयम्
- परीक्षणं करणीयम्

- नर्तितव्यम्
- निन्दितव्यम्
- तोलयितव्यम्
- तरितव्यम् / तरीतव्यम्
- गणयितव्यम्
- परीक्षितव्यम्

©All rights reserved.

अनिट्-धातूनां तव्य-रूपाणि

आकारान्ताः, एजन्ताः

- दा – दातव्यम्
- ज्ञा – ज्ञातव्यम्
- गै – गातव्यम्
- त्रै - त्रातव्यम्
- ह्वे - ह्वातव्यम्

इगन्तानां गुणः

- जि – जेतव्यम्
- नी – नेतव्यम्
- श्रु – श्रोतव्यम्
- कृ – कर्तव्यम्
- हृ - हर्तव्यम्

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

भगवद्गीता

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥ (१७.२०)

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ (३.२२)

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अनिट्-धातूनां तव्य-रूपाणि

हलन्तानां सन्धिः

- अद् – अत्तव्यम्
- पच् – पक्तव्यम्
- त्यज् – त्यक्तव्यम्
- गम् - गन्तव्यम्
- नम् - नन्तव्यम्

गुणः+सन्धिः

- छिद् – छेत्तव्यम्
- मुच् – मोक्तव्यम्
- भुज् – भोक्तव्यम्
- द्विष् – द्वेष्टव्यम्
- विश् - वेष्टव्यम्

©All rights reserved.

सुभाषितम्

अनुगन्तुं सतां वर्त्म कृत्स्नं यदि न शक्यते ।

स्वल्पमप्यनुगन्तव्यं मार्गस्थो नावसीदति ॥

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – ५
उदाहरणानुगुणं वदत

- दा
- भुज्
- पच्
- गै
- नम्
- स्तु

- दातुं योग्यम् / दातव्यम्

©All rights reserved.

अभ्यासः – ५
उदाहरणानुगुणं वदत

- दा
- भिद्
- वच्
- मा
- चि
- ध्यै

- दातुं योग्यम् / दातव्यम्

©All rights reserved.

अभ्यासः – ५ - उत्तराणि उदाहरणानुगुणं वदत

- दा
- भुज्
- पच्
- गै
- नम्
- स्तु

- दातुं योग्यम् / दातव्यम्
- भोक्तुं योग्यम् / भोक्तव्यम्
- पक्तुं योग्यम् / पक्तव्यम्
- गातुं योग्यम् / गातव्यम्
- नन्तुं योग्यम् / नन्तव्यम्
- स्तोतुं योग्यम् / स्तोतव्यम्

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – ५ - उत्तराणि उदाहरणानुगुणं वदत

- दा
- भिद्
- वच्
- मा
- चि
- ध्यै

- दातुं योग्यम् / दातव्यम्
- भेत्तुं योग्यम् / भेत्तव्यम्
- वक्तुं योग्यम् / वक्तव्यम्
- मातुं योग्यम् / मातव्यम्
- चेतुं योग्यम् / चेतव्यम्
- ध्यातुं योग्यम् / ध्यातव्यम्

©All rights reserved.

अनिट्-धातूनां तव्य-रूपाणि

महाप्राणान्ताः

- बन्ध् – बन्द्धव्यम्
- लभ् – लब्धव्यम्
- सिध् – सेद्धव्यम्
- रुध् – रोद्धव्यम्
- युध् - योद्धव्यम्

विशेषरूपाणि

- दृश् – द्रष्टव्यम्
- वह् – वोढव्यम्
- दुह् – दोग्धव्यम्
- प्रच्छ् – प्रष्टव्यम्
- सृज् - स्रष्टव्यम्

©All rights reserved.

भगवद्गीता

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।

अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ (४.१७)

अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।

यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥ (१७.११)

©All rights reserved.

अभ्यासः – ६

समुचितं तव्यदन्तं चित्वा लिखत

(साद्धव्यम्, क्रष्टव्यम्, दोग्धव्यम्, सोढव्यम्, बोद्धव्यम्, लब्धव्यम्)

- क्षीरं _____
- क्षेत्रं _____
- धनं _____
- तत्त्वं _____
- कार्यं _____
- कष्टं _____

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

अभ्यासः – ६ - उत्तराणि

समुचितं तव्यदन्तं चित्वा लिखत

(साद्धव्यम्, क्रष्टव्यम्, दोग्धव्यम्, सोढव्यम्, बोद्धव्यम्, लब्धव्यम्)

- क्षीरं _____
- क्षेत्रं _____
- धनं _____
- तत्त्वं _____
- कार्यं _____
- कष्टं _____

- दोग्धव्यम्
- क्रष्टव्यम्
- लब्धव्यम्
- बोद्धव्यम्
- साद्धव्यम्
- सोढव्यम्

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

वेट् धातवः

- क्लिद् – क्लेदितव्यम् / क्लेत्तव्यम्
- इष् – एषितव्यम् / एष्टव्यम्
- लुभ् – लोभितव्यम् / लोब्धव्यम्
- क्षम् – क्षमितव्यम् / क्षन्तव्यम्
- गाह् – गाहितव्यम् / गाढव्यम्
- तक्ष् – तक्षितव्यम् / तष्टव्यम्
- गुप् – गोपितव्यम् / गोप्तव्यम्
- क्लृप् – कल्पितव्यम् / क्लृप्तव्यम्
- तृप् – तर्पितव्यम् / त्रप्तव्यम्
- दृप् – दर्पितव्यम् / द्रप्तव्यम्
- द्रुह् – द्रोहितव्यम् / द्रोग्धव्यम्
- सह् – सहितव्यम् / सोढव्यम्

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

उदाहरणम्

यदि किञ्चिदतिक्रान्तं विश्वासात् प्रणयेन वा ।

प्रेष्यस्य क्षमितव्यम् मे न कश्चिन्नापराध्यति ॥

॥ वाल्मीकिरामायणम् ४-३६-११ ॥

©All rights reserved.
Sowmya Krishnapur (sowmya.krishnapur@gmail.com)

प्रार्थना

विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाशक्यत्वात् तव चरणयोर्या च्युतिरभूत् ।
तदेतत् क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥

(देव्यपराधक्षमापनस्तोत्रम्)

©All rights reserved.

QUESTIONS/DOUBTS?

Email us @

sanskritfromhome@vyomalabs.in

- For downloading course-materials, login @ www.sanskritfromhome.in
- Subscribe to our youtube channel @ vyoma-samskrta-pathasala
- Buy our Samskrita-learning products @ www.digitalsanskritguru.com
- Support our cause for Samskrita-Samskriti @ www.vyomalabs.in

©All rights reserved.

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.

All materials shared in our website are purely for the purpose of personal study.

Replication/reuse in any form without written permission from the organisation is prohibited.